# श्रीमद्भागवत रसिक कुटुंब

## लक्ष्मीस्तोत्रम्

**इंद्र उवाच**

ॐ नमः(ख्) कमलवासिन्यै , नारायण्यै नमो नमः।
कृष्णप्रियायै सारायै, पद्मायै च नमो नमः॥1॥

पद्मपत्रेक्षणायै च, पद्मास्यायै नमो नमः।
पद्मासनायै पद्मिन्यै, वैष्णव्यै च नमो नमः॥2॥

सर्वसम्पत्स्वरूपायै, सर्वदात्र्यै नमो नमः।
सुखदायै मोक्षदायै, सिद्धिदायै नमो नमः॥3॥

हरिभक्तिप्रदात्र्यै च, हर्षदात्र्यै नमो नमः।
कृष्णवक्षःस्थितायै च, कृष्णेशायै नमो नमः॥4॥

कृष्णशोभास्वरूपायै, रत्नपद्मे च शोभने।
संपत्त्यधिष्ठातृदेव्यै, महादेव्यै नमो नमः॥5॥

शस्याधिष्ठातृदेव्यै च, शस्यायै च नमो नमः।
नमो बुद्धिस्वरूपायै, बुद्धिदायै नमो नमः॥6॥

वैकुण्ठे या महालक्ष्मीर्- या लक्ष्मीः क्षीरसागरे।
स्वर्गलक्ष्मीरिन्द्रगेहे, राजलक्ष्मीर्नृपालये॥7॥

गृहलक्ष्मीश्च गृहिणां(ङ्), गेहे च गृहदेवता।
सुरभिः(स्) सा गवां माता, दक्षिणा यज्ञकामिनी॥8॥

अदितिर्देवमाता त्वं(ङ्), कमला कमलालये।
स्वाहा त्वं(ञ्) च हविर्दाने, कव्यदाने स्वधा स्मृता॥9॥

त्वं हि विष्णुस्वरुपा च, सर्वधारा वसुंधरा।
शुद्धसत्त्वस्वरूपा त्वं(न्), नारायणपरायणा॥10॥

क्रोधहिंसावर्जिता च, वरदा च शुभानना।
परमार्थप्रदा त्वं(ञ्) च, हरिदास्यप्रदा परा॥11॥

यया विना जगत्सर्वं, भस्मीभूतमसारकम्।
जीवन्मृतं(ञ्) च विश्वं(ञ्) च , शवतुल्यं(यँ) यया विना॥12॥

सर्वेषां(ञ्) च परा त्वं हि, सर्वबान्धवरूपिणी।
यया विना न संभाष्यो, बान्धवैर्बान्धवः(स्) सदा॥13॥

त्वया हीनो बन्धुहीनो, त्वया युक्तः(स्) सबान्धवः।
धर्मार्थकाममोक्षाणां(न्), त्वं(ञ्) च कारणरूपिणी॥14॥

यथा माता स्तनन्धानां, शिशूनां शैशवे यथा।
तथा त्वं सर्वदा माता, सर्वेषां सर्वरूपतः॥15॥

मातृहीनः(स्) स्तनान्धश्च , स चेज्जीवति दैवतः।
त्वया हीनो जनः(ख्) कोऽपि , न जीवत्येव निश्चितम्॥16॥

सुप्रसन्नस्वरूपा त्वं , मां प्रसन्ना भवाम्बिके।
वैरिग्रस्तं(ञ्) च विषयं(न्), देहि मह्यं सनातनि॥17॥

वयं(यँ) यावत् त्वया हीना, बन्धुहीनाश्च भिक्षुकाः।
सर्वसंपद्विहीनाश्च , तावदेव हरिप्रिये॥18॥

राज्यं(न्) देहि श्रियं(न्) देहि , बलं(न्) देहि सुरेश्वरि।
कीर्तिं(न्) देहि धनं(न्) देहि, यशो मह्यं(ञ्) च देहि वै॥19॥

कामं(न्) देहि मतिं(न्) देहि, भोगान् देहि हरिप्रिये।
ज्ञानं(न्) देहि च धर्मं(ञ्) च, सर्वसौभाग्यमीप्सितम्॥20॥

प्रभावं(ञ्) च प्रतापं(ञ्) च, सर्वाधिकारमेव च ।
जयं पराक्रमं(यँ) युद्धे, परमैश्वर्यमेव च॥21॥

फलश्रुतिः

इदं स्तोत्रं महापुण्यं(न्), त्रिसंध्यं(यँ) यः(फ्) पठेन्नरः।
कुबेरतुल्यः(स्) स भवेद्, राजराजेश्वरो महान्॥22॥

सिद्धस्तोत्रं(यँ) यदि पठेत्, सोऽपि कल्पतरुर्नरः।
पञ्चलक्षजपेनैव, स्तोत्रसिद्धिर्भवेन्नृणाम्॥23॥

सिद्धिस्तोत्रं(यँ) यदि पठेन्- मासमेकं(ञ्) च संयतः।
महासुखी च राजेन्द्रो, भविष्यति न संशयः॥24॥

॥ इति श्री ब्रह्मवैवर्तपुराणे इंद्रकृतं(लँ) लक्ष्मीस्तोत्रं संपूर्णम्॥

## महालक्ष्मीस्तुतिः

अगस्तिरुवाच

मातर्नमामि कमले कमलायताक्षि,
श्रीविष्णुहृत्कमलवासिनि विश्वमातः।
क्षीरोदजे  कमलकोमलगर्भगौरि,
लक्ष्मि प्रसीद सततं(न्) नमतां शरण्ये।।1।।

त्वं श्रीरुपेन्द्रसदने मदनैकमातर्-
ज्योत्स्नासि चन्द्रमसि चन्द्रमनोहरास्ये।
सूर्ये प्रभासि च जगत्त्रितये प्रभासि,
लक्ष्मि प्रसीद सततं(न्) नमतां शरण्ये।।2।।

त्वं(ञ्) जातवेदसि सदा दहनात्मशक्तिर्-
वेधास्त्वया जगदिदं(वँ) विविधं(वँ) विदध्यात्।
विश्वम्भरोऽपि बिभृयादखिलं भवत्या,
लक्ष्मि प्रसीद सततं(न्) नमतां शरण्ये।।3।।

त्वत्त्यक्तमेतदमले हरते हरोऽपि,
त्वं पासि हंसि विदधासि परावरासि।
ईड्यो बभूव हरिरप्यमले त्वदाप्त्या,
लक्ष्मि प्रसीद सततं(न्) नमतां शरण्ये।।4।।

शूरः(स्) स एव स गुणी स बुधः(स्) स धन्यो,
मान्यः(स्) स एव कुलशीलकलाकलापैः।
एकः(श्) शुचिः(स्) स हि पुमान् सकलेऽपि लोके,
यत्रापतेत्तव शुभे करुणाकटाक्षः ।।5।।

यस्मिन्वसेः क्षणमहो पुरुषे गजेऽश्वे,
स्त्रैणे तृणे सरसि देवकुले गृहेऽन्ने।
रत्ने पतत्रिणि पशौ शयने धरायां,
सश्रीकमेव सकले तदिहास्ति नान्यत्।।6।।

त्वत्स्पृष्टमेव सकलं शुचितां(ल्ँ) लभेत,
त्वत्त्यक्तमेव सकलं(न्) त्वशुचीह लक्ष्मि।
त्वन्नाम यत्र च सुमंगलमेव तत्र,
श्रीविष्णुपत्नि कमले कमलालयेऽपि।।7।।

लक्ष्मीं श्रियं(ञ्) च कमलां(ङ्) कमलालयां(ञ्) च,
पद्मां रमां(न्) नलिनयुग्मकरां(ञ्) च मां(ञ्) च।
क्षीरोदजाममृतकुम्भकरामिरां(ञ्) च,
विष्णुप्रियामिति सदा जपतां(ङ्) क्व दुःखम।।8।।

ये पठिष्यन्ति च स्तोत्रं(न्), त्वद्भक्त्या मत्कृतं सदा।
तेषां(ङ्) कदाचित् संतापो, माऽस्तु माऽस्तु दरिद्रता।।9।।

माऽस्तु चेष्टवियोगश्च, माऽस्तु सम्पत्तिसंक्षयः।
सर्वत्र विजयश्चाऽस्तु, विच्छेदो माऽस्तु सन्ततेः।।10।।

श्रीरुवाच

एवमस्तु मुने सर्वं(यँ), यत्त्वया परिभाषितम्।
एतत् स्तोत्रस्य पठनं , मम सांनिध्यकारणम्।।11।।

।।इति श्रीस्कन्दमहापुराणे काशीखण्डे अगस्तिकृता महालक्ष्मीस्तुतिः सम्पूर्णा।।

## महालक्ष्म्यष्टोत्तरशतनामस्तोत्रम्

ॐ विघ्नेश्वरमहाभाग, सर्वलोकनमस्कृत ।
मयाऽऽरब्धमिदं(ङ्) कर्म, निर्विघ्नं(ङ्) कुरु सर्वदा ॥

शुद्धलक्ष्म्यै बुद्धिलक्ष्म्यै, वरलक्ष्म्यै नमो नमः ।
नमस्ते सौभाग्यलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥1॥

वचोलक्ष्म्यै काव्यलक्ष्म्यै, गानलक्ष्म्यै नमो नमः ।
नमस्ते शृङ्गारलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥2॥

धनलक्ष्म्यै धान्यलक्ष्म्यै, धरालक्ष्म्यै नमो नमः ।
नमस्तेऽष्टैश्वर्यलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥ 3॥

गृहलक्ष्म्यै ग्रामलक्ष्म्यै, राज्यलक्ष्म्यै नमो नमः ।
नमस्ते साम्राज्यलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥4॥

शान्तलक्ष्म्यै दान्तलक्ष्म्यै, क्षान्तलक्ष्म्यै नमो नमः ।
नमोऽस्त्वात्मानन्दलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥5॥

सत्यलक्ष्म्यै दयालक्ष्म्यै, सौख्यलक्ष्म्यै नमो नमः ।
नमः(फ्) पातिव्रत्यलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥ 6॥

गजलक्ष्म्यै राजलक्ष्म्यै, तेजोलक्ष्म्यै नमो नमः ।
नमः(स्) सर्वोत्कर्षलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥ 7॥

सत्त्वलक्ष्म्यै तत्त्वलक्ष्म्यै, बोधलक्ष्म्यै नमो नमः ।
नमस्ते विज्ञानलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥ 8॥

स्थैर्यलक्ष्म्यै वीर्यलक्ष्म्यै, धैर्यलक्ष्म्यै नमो नमः ।
नमस्तेऽस्त्वौदार्यलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥ 9॥

सिद्धिलक्ष्म्यै ऋद्धिलक्ष्म्यै, विद्यालक्ष्म्यै नमो नमः ।
नमस्ते कल्याणलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥10॥

कीर्तिलक्ष्म्यै मूर्तिलक्ष्म्यै, वर्चोलक्ष्म्यै नमो नमः ।
नमस्ते त्वनन्तलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥11॥

जपलक्ष्म्यै तपोलक्ष्म्यै, व्रतलक्ष्म्यै नमो नमः ।
नमस्ते वैराग्यलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥12॥

मन्त्रलक्ष्म्यै तन्त्रलक्ष्म्यै, यन्त्रलक्ष्म्यै नमो नमः ।
नमो गुरुकृपालक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥13॥

सभालक्ष्म्यै प्रभालक्ष्म्यै, कलालक्ष्म्यै नमो नमः ।
नमस्ते लावण्यलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥14॥

वेदलक्ष्म्यै नादलक्ष्म्यै, शास्त्रलक्ष्म्यै नमो नमः ।
नमस्ते वेदान्तलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥15॥

क्षेत्रलक्ष्म्यै तीर्थलक्ष्म्यै, वेदिलक्ष्म्यै नमो नमः ।
नमस्ते सन्तानलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥16॥

योगलक्ष्म्यै भोगलक्ष्म्यै, यज्ञलक्ष्म्यै नमो नमः ।
क्षीरार्णवपुण्यलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥17॥

अन्नलक्ष्म्यै मनोलक्ष्म्यै, प्रज्ञालक्ष्म्यै नमो नमः ।
विष्णुवक्षोभूषलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥18॥

धर्मलक्ष्म्यै अर्थलक्ष्म्यै, कामलक्ष्म्यै नमो नमः ।
नमस्ते निर्वाणलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥19॥

पुण्यलक्ष्म्यै क्षेमलक्ष्म्यै, श्रद्धालक्ष्म्यै नमो नमः ।
नमस्ते चैतन्यलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥20॥

भूलक्ष्म्यै ते भुवर्लक्ष्म्यै, सुवर्लक्ष्म्यै नमो नमः ।
नमस्ते त्रैलोक्यलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥21॥

महालक्ष्म्यै जनलक्ष्म्यै, तपोलक्ष्म्यै नमो नमः ।
नमः(स्) सत्यलोकलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥22॥

भावलक्ष्म्यै वृद्धिलक्ष्म्यै, भव्यलक्ष्म्यै नमो नमः ।
नमस्ते वैकुण्ठलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥23॥

नित्यलक्ष्म्यै सत्यलक्ष्म्यै, वंशलक्ष्म्यै नमो नमः ।
नमस्ते कैलासलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥24॥

प्रकृतिलक्ष्म्यै श्रीलक्ष्म्यै, स्वस्तलक्ष्म्यै नमो नमः ।
नमस्ते गोलोकलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥25॥

शक्तिलक्ष्म्यै भक्तिलक्ष्म्यै, मुक्तिलक्ष्म्यै नमो नमः ।
नमस्ते त्रिमूर्तिलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥26॥

नमश्चक्रराजलक्ष्म्यै, आदिलक्ष्म्यै नमो नमः ।
नमो ब्रह्मानन्दलक्ष्म्यै, महालक्ष्म्यै नमो नमः ॥27॥

ॐ कनकलक्ष्म्यै नमः ।उद्योगलक्ष्म्यै नमः ।सर्वाभीष्टफलप्रदायै नमः ।
॥इति श्रीमहालक्ष्म्यष्टोत्तरशतनामस्तोत्रम् संपूर्णम्॥

